मिश्रः, पुं, (मिश्र + बाहुलकात् रक् ।) गजजातिविशेषः । यथा, —
"भद्रो मन्द्रो मृगो मिश्रश्चतस्रो गजजातयः ।"
इति हेमचन्द्रः । ४ । २८४ ॥
श्रेष्ठः । यथा । गौरविताश्चार्य्यमिश्राः । इति भूरिप्रयोगः ॥ संयुक्ते, त्रि । यथा,—
"करम्बः कवरो मिश्रः संपृक्तः खचितः समाः ।
इति हेमचन्द्रः । ६ । १०५ ॥
उग्रादिसप्तगणान्तर्गतसप्तमगणः । स तु कृत्तिका विशाखाभ्यां भवति । इति ज्योतिस्तत्त्वम् ॥

मिश्रकं, क्ली, ( मिश्र + कन् । ) देवोद्यानम् । इति जटाधरः ॥ औषरलवणम् । इति राजनिर्घण्टः ॥ ( मिश्र + ण्वुल् । त्रि, मिश्रणकर्त्ता । यथा, मनौ । ११ । ५० ।
"पिशुनः पौतिनासिक्यं सूचकः पूतिवक्त्रताम् । धान्यचौरोऽङ्गहीनत्वमातिरैक्यन्तु मिश्रकः ।"
तीर्थभेदः । यथा, महाभारते ।३।८३।८२।
"ततो गच्छेत धर्म्मज्ञ ! मिश्रकं लोकविश्रुतम् । तत्र तीर्थानि राजेन्द्र ! मिश्रितानि महात्मना ॥")

मिश्रकावणं, क्ली, (मिश्रकाणां वनम् । "वनगिर्य्योः संज्ञायां कोटरकिंशुलकादीनाम् ।" ६ । ३ । ११७ । अकारस्याकारः "वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः ।" ८ । ४ ।४ । इति णत्वम् । ) इन्द्रस्योद्यानम् । यथा,—
"नन्दनं कन्दसारं स्यान्मिश्रकावणमित्यपि ।"
इति त्रिकाण्डशेषः ॥

मिश्रजः, पुं, (मिश्रात् भिन्नजातीययोः सम्मेलनात् जात इति । जन + डः । ) खेसरः । इति राजनिर्घण्टः ॥

मिश्रणं, क्ली, मिश्रधातोर्भावेऽनट् ( ल्युट् ) प्रत्ययेन निष्पन्नम् । संयोजनम् । एकत्रीकरणम् । ( यथा, प्रबोधचन्द्रोदये । २ । ५ ।
"तदेतैर्वाङ्मिश्रणमपि गुरुतरदुरितोदयाय ॥")

मिश्रपुष्पा, स्त्री, ( मिश्राणि परस्परं संश्लिष्टानि पुष्पाण्यस्याः । ) मेथिका । इति राजनिर्घण्टः ॥

मिश्रवर्णं, क्ली, ( मिश्रः मिलितः वर्णोऽस्य । ) कृष्णागुरु । इति राजनिर्घण्टः ॥ नानावर्णयुक्ते, त्रि ॥

मिश्रवर्णफला, स्त्री, ( मिश्रवर्णं फलमस्याः । ) वार्त्ताकी । इति राजनिर्घण्टः ॥

मिश्रशब्दः, पुं, ( मिश्रः मिलितः अश्वरासभयोरिव शब्दोऽस्य । ) खेसरः । इति राजनिर्घण्टः ॥

मिश्रितं, त्रि, (मिश्रः श्रेष्ठत्वमस्य संजातम् । मिश्र + इतच् । यद्वा, मिश्र + क्तः । ) गौरवितम् । इति जटाधरः ॥ मिलितञ्च ॥

मिश्रिता, स्त्री, ( मिश्रित + टाप् । ) मन्दादिसप्तधासंक्रान्त्यन्तर्गतसंक्रान्तिविशेषः । यथा,
"मन्दा ध्रुवेषु विज्ञेया मृदौ मन्दाकिनी तथा । क्षिप्रे ध्वाङ्क्षी विजानीयादुग्रे घोरा प्रकीर्त्तिता ॥
चरे मेघोदरी ज्ञेया क्रूरे क्षेत्रेस्तु राक्षसी ।
मिश्रिता चैव विज्ञेया मिश्रितर्क्षेस्तु संक्रमे ॥"
इति तिथ्यादितत्त्वम् ॥

मिश्रेया, स्त्री, मधुरिका । इत्यमरः । २।४।१०५ ॥ मौरि इति भाषा ।
"मिश्रेया सुरसा पेया त्वचाढ्या स्कन्दबन्धना ।"
इति शब्दचन्द्रिका च ॥ शाकविशेषः । शतपुष्पा । शुलुफा इति भाषा । तत्पर्य्यायः । ताल्लपर्णी २ तालपर्णी ३ मिषिः ४ शालेया ५ शीतशिवा ६ शालीना ७ वनजा ८ अवाक्पुष्पी ९ मधुरिका १० छत्रा ११ संहितपुष्पिका १२ सुपुष्पा १३ सुरसा १४ वज्रा १५ । अस्या गुणाः । मधुरत्वम् । स्निग्धत्वम् । कटुत्वम् । परमकफहरत्वम् । वातपित्तोत्थदोषघ्नीहजन्तुविनाशित्वञ्च । इति राजनिर्घण्टः । तत्पर्य्यायगुणाः ।
"शतपुष्पा शताह्वा च मधुरा कारवी मिसिः । अतिच्छत्रा सितच्छत्रा संहितच्छत्रिकापि च ॥ छत्रा शालेयशालिन्यौ मिश्रेया मधुरा मिसिः । शतपुष्पा लघुस्तीक्ष्णा पित्तकृद्दीपनी कटुः ॥ उष्णा ज्वरानिलश्लेष्मव्रणशूलाक्षिरोगहृत् । मिश्रेया तद्गुणा प्रोक्ता विशेषाद्योनिशूलनुत् ॥ अग्निमान्द्यहरी हृद्या बद्धविट्कृमिशूलहृत् । रूक्षोष्णा पाचनी कासवमिश्लेष्मानिलान् हरेत् ॥"
इति भावप्रकाशः ॥

मिष उ सेचने । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) उ मेषित्वा मिष्ट्वा । इति दुर्गादासः ॥

मिष श स्पर्द्धे । इति कविकल्पद्रुमः ॥ ( तुदा०-पर०-सक०-सेट् । ) स्पर्द्धः पराभिभवेच्छा । इति वोपदेवः ॥ श मिषति बली बलवन्तम् । इति दुर्गादासः ॥

मिषं, क्ली, (मिष् + कः ।) छलम् । इति मेदिनी । षे, २१ ॥ ( यथा, नैषधे । १ । ११८ ।
"प्रियासु बालासु रतक्षमासु च
द्विपत्रितं पल्लवितञ्च बिभ्रतम् ।
स्मरार्जितं रागमहीरुहाङ्कुरं
मिषेण चञ्च्वोश्चरणद्वयस्य च ॥")

मिषः, पुं, (मिष् + कः ।) स्पर्द्धनम् । इति मेदिनी । षे, २१ ॥ ( यथा, कथासरित्सागरे । ६४ । १२५ ।
"इति ध्यायन् मिषं कृत्वा तदैवास्फुटया गिरा । निर्गत्यैव विरक्तात्मा धनदेवान्तिकं ययौ ॥")

मिषिः स्त्री, ( मिष् + इन् । ) जटामांसी । इति शब्दरत्नावली ॥ मधुरिका । इति शब्दचन्द्रिका ॥ ( यथास्य पर्य्यायः ।
"अवाक्पुष्पी च छत्रा स्याच्छल्या मधुरा मिषिः ।"
इति वैद्यकरत्नमालायाम् ॥)
शतपुष्पा । इत्यमरटीकायां भरतः ॥

मिषिका, स्त्री, ( मिषि + कन् + टाप् । ) जटामांसी । इति शब्दरत्नावली ॥

मिष्टं, त्रि, सिक्तम् । स्पर्द्धितम् । इति मिष्धातोः क्तप्रत्ययेन निष्पन्नम् ॥

मिष्टः, पुं, ( मिष् + क्तः । ) मधुररसः । यथा,
"मिष्टः कटुश्च मधुरमम्लोऽम्लं पच्यते रसः । कटुतिक्तकषायाणां पाकः स्यात् प्रायशः कटुः ॥"
इति भावप्रकाशः ॥
"नूतनसर्षपशाकं नवौदनं पिच्छिलानि च दधीनि । अल्पव्ययेन सुन्दरि ! ग्राम्यजनो मिष्टमश्नाति ॥"
इति छन्दोमञ्जरी च ॥

मिष्टपाकः, पुं, ( मिष्टेन पाको यस्य । ) शर्करारसपक्वफलादिः । मोरब्बा इति पारस्यभाषा ॥ तदेकप्रकारो यथा । अपक्वाम्रं द्विखण्डं कृत्वा तन्मध्ये शलाकया छिद्रजालकरणान्तरं चूर्णमिश्रितजले दण्डचतुष्टयं स्थापयित्वा जलेन धौतं कुर्य्यात् । ततो जलेन सिद्धं कृत्वा जलत्यागपूर्ब्बकमेकतारबद्धशर्करारसे मधुकरणानन्तरं तापं दद्यात् । रसे घनीभूते अर्द्धदण्डं यावत् तापेन निष्पन्नो भविष्यति । इति पाकराजेश्वरः ॥

मिष्टान्नं, क्ली, ( मिष्टमन्नम् । ) मधुरद्रव्यम् । इति हलायुधः ॥ अपि च ।
"मिष्टान्नपानदाताच सततं श्रद्धयान्वितः । देवपूजापरो नित्यं न प्रेतो जायते नरः ॥"
इत्यग्निपुराणम् ॥

मिसिः, मिसी, } स्त्री, ( मस्यति परिणमतीति + इन् बाहुलकादत इकारः । पक्षे ङीष् । ) मधुरिका । ( यथास्य पर्य्यायः ।
"मिसिर्म्मधुरिका मता ।"
इति गारुडे । २०८ अः ॥) जटामांसी । शतपुष्पा । इत्यमरभरतौ । (शतपुष्पार्थे पर्य्यायो यथा,—
"शतपुष्पा शताह्वा च मधुरा कारवी मिसिः । अतिलम्बी सितच्छत्रा संहितच्छत्रिकापि च ॥ छत्रा शालेयशालिन्यौ मिश्रेया मधुरा मिसिः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) उशीरी । इति राजनिर्घण्टः ॥ अजमोदा । इति मेदिनी । से, ८ ॥

मिस त क युत्याम् । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् । ) तालव्यमध्योऽयम् । दन्त्यमध्य इति वर्द्धमानः । युतिः संयोजनम् । मिस्रयति मिसयति घृतेनान्नं लोकः । इति दुर्गादासः ॥

मिह औ सेचने । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर० सक०-अनिट् । ) औ अमिक्षत् । इति दुर्गादासः ॥

मिह्निका, स्त्री, ( मेहति सिञ्चतीति । मिह + संज्ञायां कुन् टाप् अत इत्वम् । ) नीहारः । इति शब्दरत्नावली ॥ ( यथा, नैषधे ।१६।३५ ।
"विशति युवतियागे रात्रीसुखं मिह्निकाक्षणम् । दिनमणिमणिं तापे चित्तानिलाच वियासति ॥")